साऽपि दाशरथेर्योषालोकादेव सचापला ।
वैदेही दुस्सहावस्था दशाननमगात् तदा ॥ 163 ॥

सेति । दाशरथेर्योषालोकादेव - सीतासौन्दर्यदर्शनमात्रेण, चापलसहिता सा-तथाविधा वैदेही = मन्मथजाता -दुस्सहावस्था - दशाननं अगात् । सीतादेवीसौन्दर्यदर्शनात् रावणः चापलम् अतीव मन्मथपीडाञ्च अवाप इति भावः ।

केशान् निबध्य वसनं सुदृढञ्च कट्याम् उल्लङ्घयेत् भुविजनः कतिचित्पदानि ।
रामस्त्वलङ्घयदहो ननुकेश बन्ध- मात्रेण योजनशतं कपिभिस्सलीलम् ॥ 164 ॥

केशानिति । द्यूतार्थं कतिचित् पदानि लिलङ्घयिषुः जनः केशबन्ध-वस्त्रबन्ध्यादिपरिकरपूर्णो भवति । रामस्तु केशबन्धमात्रेण योजनशत्म अलङ्घयत् इत्याश्चर्यत् । (केशबन्धमात्रेण) कस्य = ज़लस्य इशः (केशः) समुद्रः तत् बन्धमात्रेण - सेतुनिर्माणेन योजनशतं - लङ्कावधिं समुद्रम् अलङ्घयत् इति वास्तवार्थः . (कं शिरोऽम्बुनोः इत्यमरः)

यः कबन्धं जघानाऽऽदौ दण्डकायां स राघवः ।
पुन : कबन्धमुत्पाद्य लंकामेत्यावधीदरिम् ॥ 165 ॥

य इति । दण्डकावने यः कबन्धं - तन्नामकं राक्षसं जघान-हतवान् सः रामः पुनः कबन्धम् उत्पाद्य - कबन्धं - जलबन्धं सेतुं कृत्वेत्यर्थः । शिष्टं स्पष्टम् ।

सवानरगणो रामः कटाक्षेण विराजते ।
कदनादप्रयुक्ताक्षकर्णपाशाद्विमोचितः ॥ 166 ॥

स इति । हे विराज-गरुड ! ते कटाक्षेण सवानरगणः रामः । कदेत्यादि - कं ददातीति कदः = मेघः कदनादः - मेघनादः तत्प्रयुक्तः यः अक्षकर्ण पाशः नागपाशः तस्मात् विमोचितः ।

नागपाशावबद्धास्ते मेघनादेन वानराः ।
विनाशं प्राप्य युद्धाय पुनरुत्तस्थुरद्भुतम् ॥ 167 ॥

नागेति । विना-गरुडेन, शं - नागपाशमोचनरुपसुखं, प्राप्य युद्धाय पुनः उत्तस्थुः ।

दशग्रीवे तु सैन्येन सह युद्धाय निर्गते ।
परीतं विपरीतेहविपरीतं विलोक्य च ॥
विपरीतं धवस्यैव तत्पत्नी निश्चिकाय सा ॥ 168 ॥

दशेति । परीतं दिवा। विपरीतेहविपरीतं - विपरीतं = शर्वरी, तत्र ईहा - इच्छा येषां ते च ते, वयः = पक्षिणः



घूकादयः तैः परीतं व्याप्तं विलोक्य । धवस्य - रावणस्य विपरीतं 'धव' शब्दस्य - वैपरीत्ये वध इति भवति । रावणे युद्धाय निर्गते सति । दिवाऽपि घूकादि सञ्चारात् दुश्शकुनमालोक्य मन्दोदरी रावणो रामेण हतो भविष्यतीति निश्चिकायेत्यर्थः । परीतन्तु दिवा प्रोक्तं विपरीतन्तु शर्वरी इति कोशः । (दिवान्धः कौशिको घूको दिवाभीतो निशाटनः इति अमरः)

राक्षसेशं निहत्यैव शान्तमाशामुखं ततः ।
विमुखं भीषणं राज्ये ह्यभ्यषिञ्चत् कथं प्रभुः ॥ 169 ॥

राक्षसेशं इति । राक्षसेशं शकारान्तत्वात् - शान्तम् - आशामुखं = दशास्यं हत्वा । विमुखं -'वि' इत्यक्षर - मुख भागकं भीषणं = विभीषणं इत्यर्थः । शिष्टं स्पष्टम् । राज्ये सलिप्सं शान्तं निहत्य, राज्ये विमुखं भयंकरं (भीषणं) कथमभ्यषिञ्चत् इति विरोधार्थः ।

असितो राक्षसान् हत्वा राघवो यशसासितः ।
हरितश्च तथा कुर्वन् रक्तो नगरदर्शने ॥ 170 ॥

असित इति । असितः = खड्गात् - तथा सितः इत्यर्थः । एक एव रामः । सितः असितः हरितः रक्त इति चतुरोक्तिः अत्र ज्ञेया ।

बहुरूपकपीतस्सन् जटावानपि मस्तके ।
सपुष्पकस्सदाराति हर्षोऽयोध्यां जगाम ह ॥ 171 ॥

बह्विति । बहुरूपैः कपिभिः इतः (सन्) मस्तके जटावान् पुष्पकविमानसहितः सदारश्चासावति हर्षश्च - सदारातिहर्षः अयोध्यां जगाम । राम इत्यर्थः । अत्र बहुरूपकत्वेपि पीतत्वं, जटावत्वेपि सपुष्पकत्वं, सदा अरातिहर्षः एते विरुद्धाः इति विरोध रूपापातार्थैः अपि शब्द सूच्यः ।

असीता रावणं हत्वा ससीता रघुनन्दनः ।
अयोध्याधिपतिश्चाऽपि पुनाराज्यमवाप्तवान् ॥ 172 ॥

असीत इति । असिना इतः खड्गेन रावणं हत्वा, सीताविशिष्टः अयोध्याधिपतिः रघुनन्दनः राज्यं पुनरवाप्येत्यर्थः । असीतः ससीतः पुनः इति विसर्गाणां रेफपरत्वाद्दीर्घत्वम् । 'पुना' इत्याधुनिको नगरविशेषः । अयोध्याधिपतिरपि पुनाराज्यं प्रापेत्यापातप्रतीतविरोधः अपि चाऽऽभ्यां सूचितः ।

निश्शङ्कोऽपि कपिव्रातः सत्कृतो राघवादहो ।
शङ्कामनन्तां प्राप्याऽगात् अयोध्यायास्स्वकं पुरम् ॥ 173 ॥

निरिति । अनन्तां शंकां - अन्त्याक्षरशून्यां शंकां शं इत्यर्थः ।

अमर्त्यमुखतश्शुद्धां ज्ञात्वा सीतां सुराग्रतः ।
श्रुत्वामर्त्यमुखाद्वार्तां रामस्तत्याजतां बत ॥ 174 ॥

अमर्त्येति । सीतां सुराग्रतः लंकायां ब्रह्मरुद्रादि सन्निधौ । अमर्त्य मुखतः । अग्नेः अग्निमुखा वै देवाः इति श्रुतेः - शुद्धां ज्ञात्वापि, मर्त्यमुखात् - अयोध्यायां कस्यचन नरस्य वचनात् - वार्तां, संवत्सरं रावणवशं गतां पत्नीं रामः कथम् अङ्गीचकारेति वचनं श्रुत्वा तां सीतां तत्याज । बतेति खेदे । अमर्त्यमुखतश्शुद्धायाः मर्त्यमुखात् अशुद्धत्वं श्रुत्वा तत्परित्यागः अत्यन्तविरुद्ध इति च भाति ।

त्यक्तगोत्रादरोऽपीशः सानुगो लक्ष्मणाग्रजः ।
उत्सृज्य स्वपुरीं भूयोऽप्ययोध्यामद्भुतं ययौ ॥ 175 ॥

त्यक्तेति । लक्ष्मणाग्रजः सानुगः स्वपुरीं त्यक्त्वा - परित्यक्त - भूम्याशोऽपि पुनः अयोध्यां प्रापेत्याश्चर्यम् । अयोध्येति परमपदस्य नाम - तदवापेति भावः । एतत् श्लोकद्वयमुत्तरकाण्डकथार्थकम् ।

अस्मिन् गूढशब्दप्रकरणे कावार्ता इति श्लोकमारभ्य एतत् श्लोकपर्यन्तं किञ्चित्गूढशब्दप्रयोगद्वारा रामायणकथा संग्रहेण क्रमशः उक्ता ।

## षोडशप्रकरणम् - अर्थगूढम्

उदारत्वं अपर्णायाः कविप्रीतिस्सुराद्विषाम् ।
क्षुधि भक्तादरस्त्वेते न हि राज्ञः कलौ युगे ॥ 176 ॥

उदारत्वमिति । कलौ राज्ञः उदारत्वं नास्ति किन्तु पार्वत्या एव - (उः शम्भुः) उदारत्वं शम्भुपत्नीत्वम् इत्यर्थः । कविप्रीतिः - विद्वत्प्रीतिः शुक्रप्रीतिश्च भक्तादरः - आश्रितादरः अन्नादरश्च ।

अबन्धुसन्निधौ पान्थो बध्दान्नं बुभुजे स च ।
विषं ददौ स तत्पीत्वा सुहितोऽभवदत्भुतम् ॥ 177 ॥

अबन्ध्विति । अबन्धुः - जलकूपः । सः विषं जलं ददौ । (विषमप्सु च इत्यमरः) सुहितः - तृप्तः । पुंस्येवाऽन्धुः प्रहिः कूप इत्यमरः ।

सदास्वानिष्टमध्यस्थम् इति मत्वेव दातृभिः ।
त्यज्यते कनकं नित्यं कान्तत्वेऽप्यर्थिनां गणे ॥ 178 ॥

सदेति । दातृणां नकारस्यानिष्टत्वात् तन्मध्यकं कनकं त्यज्यते । अर्थिभ्यो। दिय्यते । कान्तत्वं = रम्यत्वं, कवर्णान्त्यत्वञ्च ।

जेतुस्सनाद इति किम् इन्द्रेणाऽधः कृतोऽम्बुधः ।
दुर्बलानां बलिष्ठेऽरौ तत्पक्षे हि पराक्रमः ॥ 179 ॥

जेतुरिति। मेघः स्वजेतुः - इन्द्रजितः सनादः इति मत्वा इन्द्रेण अधः कृतः वाहनीकृत इत्यर्थः । इन्द्रजितो मेघनाद नामकत्वात् । अरौ बलिष्ठे सति दुर्बलानां - तत्सम्बन्धिनि पराक्रमः ।

माजानिपत्कविलसत्ककुमारतात मारप्रतीकहविलोचन मानितांग ।
अम्भोजबन्धुसुतगर्वहरान्धकारे शम्भो शमत्रिनयनोद्भवशीर्ष देहि ॥ 180 ॥

माजानीति । रुद्रविषयोऽयं श्लोकः । माजानिः - विष्णुः तस्य पत्कं - पदसम्बन्धि जलं = गंगेत्यर्थः तया विलसत् कं - शीर्षं यस्य - तथाभूत मारस्य प्रतीकह - शरीर दाहकं विलोचनं यस्य तथाभूत, अम्भोजबन्धु (सूर्य) सुतः - यमः तस्य गर्वहरः । अत्रिनयनोद्भवशीर्ष - (चन्द्रशेखरः) चन्द्रस्य अत्रिनेत्र समुद्भवत्वं पुराणप्रसिद्धं । शं देहि - सुखं दद । शिष्टं स्पष्टम् ।

स्वसमानाख्य वस्त्वेष बाधते नित्यमित्ययम् ।
स्वारादिवर्णसंयुक्तभानुर्भानुं ग्रसत्यहो ॥ 181 ॥

स्वेति । 'स्वर' इति आदि वर्ण युक्तः भानुः = स्वर्भानुः राहुरित्यर्थः । स्वसमानाख्य वस्तु - तम इत्यर्थः तमश्शब्दस्यापि राहु वाचकत्वात् ।

बाले तव गळन्दृष्ट्वा क्रमुकग्रीवया समम् ।
अदरप्रीतिमानासीत् जनस्सर्वोऽपि तत् प्रिया ॥ 182 ॥

बाल इति । सर्वोऽपि जनः- अदरप्रीतिः - गळे अधिकप्रीतिमान् - (दर) शंखप्रीतिरहितश्च तव गळेन शंखो जित इति भावः ।

मध्ययोधे च वह्न्यन्ते नाद्यक्षर मुखे च ये ।
दृढे दुर्गे तयोर्लाभात् सर्वं जयति चाऽबला ॥ 183 ॥

मध्य इति । मध्य यो धे - 'यो ध' इत्यक्षरद्वयमध्यके, वह्न्यन्ते - वह्निवाचक - 'र' इत्यन्त्याक्षरे, नाद्यक्षरमुखे - 'न' वर्णः आद्यक्षरं यस्य सः पकार इत्यर्थः सः मुखभागे ययोः ते (पयोधर शब्दं भवति) दृढे कठिने एवं भूते ये दुर्गे - पयोधरयोरेव दुर्गत्वेनोक्तिः । तयोः लाभात् अबलाऽपि सर्वं जयति । दुर्गपरत्वे तु - सैन्यविशिष्ट मध्यभागे वह्निविशिष्टपार्श्वभागके अनादीति पदच्छेछः - अनादिः अक्षरश्च मुखभागो ययोः ते एवं भूतयोः दुर्गयोः प्राकारयोः इत्यर्थः ।

अपघन सारावेतावपघनसारावपि स्तनौ तस्याः ।
भजतो हि शीतलत्वं प्रकृतित एवेह शीतलाकारौ ॥ 184 ॥

अपेति ते स्तनौ अपघनसारौ = शरीरसारभूतौ । अपघनसारावपि = घनसारेण कर्पूरलेपेन-शून्यावपि, शीतलत्वं भजतः ग्रीष्मकाले इति शेषः । कथमिति अत्राह-प्रकृतित इति । स्वभावत एव शीतलस्वरूपत्वात् इत्यर्थः । शीत-लाकारौ-शि इत्यक्षरसहिता 'ला' = शिला - तदाकारौ काठिन्यात् इति तु हृदयम् । उष्णकाले स्त्रीस्तनयोः शीतलत्वं स्वाभाविकम् ।

बाले तव मुखपझं मन्ये कान्त्या न केवलम् ।
विराजिताळिकत्वेनाऽपाङ्गप्रहरणत्वतः ॥ 185 ॥

बाल इति ।तव मुखं कान्त्या केवलं पझमिति न मन्ये । किन्तु विराजिताळिकत्वेन विराजिताः अळयः यस्मिन् इति पझपक्षे । विराजितं अळिकं - ललाटं यस्मिन् इति मुखपक्षे । (ललाटमलिकं गोधिः अमरः)

तत्सौन्दर्यं चकाराद्यां महिषीषु रमां हरेः ।
कान्ते तवाऽपि सौन्दर्यं ताश्चकारादिमामहो ॥ 186 ॥

तदिति । हरेः महिषीषु - भगवत्पत्नीषु रमां तत्सौन्दर्यं - लक्ष्मी सौन्दर्यं कर्तुं आद्याञ्चकार । सर्वाधिकसौन्दर्यात् सर्वमहिषी श्रेष्टेत्यर्थः । हे कान्ते तव सौन्दर्यमपि तां-रमां, आदिमाञ्चकार अन्यसौन्दर्यं अन्यश्रैष्ठ्य हेतुः इत्याश्चर्यम् । वस्तुतस्तु तव सौन्दर्यं तां रमां चकारादिमां चरमां इत्यर्थः । चकार इत्यनुषज्यन्ते । लक्ष्मी सौन्दर्यादपि तव सौन्दर्य तां रमां चकारादिमां चरमां इत्यर्थः । चकार इत्यनुषज्यन्ते । लक्ष्मी सौन्दर्यादपि तव सौन्दर्यं अधिकमिति भावः ।

बाले तव कुचावाद्यं वर्णं कञ्चन कांक्षतः ।
साम्याय वरमध्ये तं वर्णमाख्याहि शीघ्रतः ॥ 187 ॥

बाल इति । तव कुचौ-स्वसाम्याय आदौ कञ्चन वर्णं कांक्षतः - स्वयोः किञ्चित् वर्णपूर्वकत्वे यौ भवतः तावेव स्वसदृशाविति भावः । तं वर्णं आख्याहि- 'लि' इति वर्णः स इत्यर्थः लिकुच सदृशौ तव कुचौ इति हृदयम् ।

पृथिवीमेखलाजातशीर्षवस्त्रेश्वरार्चितम् ।
जलमुक्सुमनसः पित्तमित्राशारिध्वजं भजे ॥ 188 ॥

पृथिवीति । पृथिवीमेखला = अब्धिः, तज्जातः - चन्द्रः, स शीर्षं यस्य सः रुद्रः तद्वस्त्र दिशः, तस्य दिग्वसनत्वात्-तदीश्वराः = इन्द्रादयः तैः अर्चितम् । जलमुगित्यदि - जलमुक्सुमनसः = मेघपुष्पं - जलमित्यर्थः, तत्पित्तम् = अग्निः - शुचिरप्पित्तमिति कोशात्-तन्मित्रं - वायुः, तम् अश्नन्तीति तदशाः = सर्पाः, तदरिः गरुडः, तद्ध्वजं - भगवन्तं विष्णुमित्यर्थः ।



वलजित्तनयस्य शत्रुः अत्रोज्वलवैश्वानरमित्रपुत्रनाथः ।
रणधूर्मुनिसत्रशत्रुशत्रू रघुनाथोऽवतु मित्रपुत्रमित्रम् ॥ 189 ॥

वलेति । वालिशत्रुः । अग्निमित्रभूत-वायुपुत्र - हनुमत्स्वामी - रणधुरन्धरः । मुनीनां सत्रशात्रवः = मारीच सुबाहु प्रभृतयः तच्छत्रुः (रघुनाथः) मित्रपुत्रस्य - सूर्यात्मजसुग्रीवस्य मित्रम् ।

मित्रपुत्रशत्रुपुत्रपत्रशत्रुराट्शयम् सत्रशत्रुपुत्रपत्रशत्रुशत्रुपत्रकम् ।
पत्रिकुत्रवृत्रशत्रुशक्रशत्रुपुत्रक भ्रातृमित्रमुग्रचापभञ्जकं समाश्रये ॥ 190 ॥

मित्रेति । मित्रपुत्र; यमः तच्छत्रुः रुद्रः- तत्पुत्रः गजाननः तत्पत्रं - मुषिकः, तत्शात्रवः - सर्पाः, तद्राट् = आदिशेषः, तच्छयम् । सत्र शत्रुः = रुद्रः, तत्पुत्रः सुब्रह्मण्यः तत्पत्रं मयूरः, सः शत्रुः येषां ते - सर्पाः । तत्शत्रुः गरुडः (पत्रकम्) तद्वाहकम् । पक्षिणश्च ते ये कुत्राः - पर्वताः तेषां वृत्रस्य च शत्रुभूतो यः शक्रः तच्छत्रुः - मेघनादः, स पुत्रः यस्य सः - रावणः तत्भ्राता - विभीषणः तन्मित्रभूतम् । उग्रचापभञ्जकं - विदेहराजस्थितरुद्रचापभञ्जकं सीताविवाहार्थं इत्यर्थः । अस्मिन् प्रकरणे अर्थस्याऽस्फुटत्वम् ।

## सप्तदश प्रकरणं - भावगूढम्

कान्ते पाणियुगं बिभेति वदनात् तच्चाति वक्षोभवात्
सोऽपि श्रीकचतस्स च स्मितभराद्रोमाळितस्सोऽपि च ।
नासाया भयमेति रोमलतिकाप्येवं मिथो मोहकान् -
यङ्गान्येव हि तावकानि यदिचेदस्मासु कावा कथा ॥ 191 ॥

कान्त इति । पाणि युगस्य कमलरूपणात् चन्द्रत्वेन रूपित वदनात् भयमित्यर्थः । तच्चापि - वदनमपि विन्ध्यत्वेनाभिप्रेत वक्षोभवात् ! बिभेति । तस्य चन्द्रसूर्यगति विरोधित्वादित्यर्थः । सोऽपि चक्रवाकत्वेनाभिप्रेत वक्षो भवोपि अन्धकारत्वेन अभिप्रेत कचात् बिभेति । सच कचश्च चन्द्रिकात्वेनाभिप्रेत स्मितादित्यर्थः । सोऽपि रोमाळितः राहु ग्रास्येति भावः । रोमलतिका भ्रमरत्वेनाभिप्रेता चम्पकधिया नासाया भयमेति ।

कचात् ! भीतौ रोमावळि कुच भरौ ते गमनतः करद्वन्द्वात् दृष्टौ तरुणिनयने मध्य सभये ।
प्रहृष्टे तत्रैव स्फुटतरसरो दर्शनवशात् कुचत्रस्तं हारादभयमपि वक्त्रं समभवत् ॥ 192 ॥

कचादिति । कचं दृष्ट्वा मेघ इति भ्रान्त्या मयूर - सञ्चारमाशङ्क्य रोमावली सर्पः पूर्वं भयं प्राप्य, तव गमनात् त्वां हंस इति निश्चित्य हंस सञ्चारात् वर्षाकालो नायं इति हर्षं प्राप्तः । तव कचं तम इति ज्ञात्वा विरहकाल इति भीतः कुचरूपचक्रवाकः तव करद्वन्द्वरूपं विकचकमलं आलोक्य हर्षं प्राप्तः । मध्य सभये - मध्यरूपादा - काशात् भीतौ नयन मत्स्यौ तत्रैव मध्य एव नाभिरूपं सर आलोक्य नायं आकाश इति निश्चक्रतुः । सरस आकाशवृत्तित्वाभावात् । वक्त्ररूपचन्द्रः कुचं विन्ध्यपर्वत इत्यापाततो ज्ञात्वा त्रस्तस्सन्

तत्र मुक्ताहार रूपां गंगामालोक्य नायं विन्ध्यः अपितु हिमवत् गिरिरिति निश्चित्य भयं तत्याजेति भावः ।

शशिकरपरितापात् शान्तिमप्राप्य दीर्घात् सुरगणमथराहुं सागरञ्चात्रिनेत्रम् ।
मलयगिरिज वातात् एत्य बाधान्धुशीतात् कपिकुलमथ शक्रं कामिनी काप्यनिन्दत् ।। 193 ।।

शशीति । काऽपि विरहिणीत्यर्थः । चन्द्रस्य निश्शेष - कबलीकाराकारणात ! सुरगणं । चन्द्रं ग्रसित्वा पुनर्मोचनात् राहुं । चन्द्रोत्पत्तिहेतुत्वात् सागरम् अत्रिनेत्रं च अनिन्दत् । मलय पर्वतस्य समुद्रे अपातनात् कपिकुलं, तस्य पक्षमात्रच्छेदनेन निश्शेष नाशाकरणात् इन्द्रं च अनिन्दत् ।

देवान् पृथूञ्च शक्रञ्च कर्णं कपिकुलं तथा ।
विष्णुचक्रं विशेषेण चक्रवाकीहि निन्दति ।। 194 ।।

देवानिति । महामेरुणा सूर्यतिरोधनात् स्वविरोधि रात्र्यागमनात् मेरुः चक्रवाक विरोधीत्यर्थः । स्वविरोधिनस्तस्य विहारस्थानत्वेन अङ्गीकरणात् देवान् निन्दति । पृथुचक्रवर्तिना निम्नोन्नतरूपां भूमिं समीकृत्य तत्र तत्र पर्वतस्यापनात् स्वस्याः पर्वतविरोधित्वात् च मृथुं निन्दति । पर्वत पक्षमात्रच्छेदकत्वात् शक्रम् । अर्थिभ्यो महामेरुं छित्वा दानाकरणात् कर्णम् । मेरोः समुद्रे अपातनात् कपिकुलं निन्दति । कालप्राप्त रात्रिव्यतिरेकेण ज्याद्रथ वधार्थम् अकालेऽपि रात्रि उत्पादनात् विष्णु चक्रं विशेषण निन्दतीति भावः ।

निशामुखे विधुं दृष्ट्वा दक्षिणञ्चापि मारुतम् ।
निजवेर्णी पुरस्कृत्य शेते स्त्री विरहातुरा ।। 195 ।।

निशेति । निजवेण्याः राहुरूपत्वेन तत् पुरस्कारे चन्द्रोपसर्पेत् । सर्परूपत्वेन दक्षिणमारुतोपसर्पेत् । सर्पस्य वायुभक्षकत्वात् इति भावः ।

श्रृण्वन्नादरतस्तत्र सीतावृत्तं हनूमतः ।
उद्यन्तं भास्करं दृष्ट्वा भीतोऽभूद्रघुनायकः ।। 196 ।।

श्रृण्वन्निति । उद्यत् भानुदर्शने फलभ्रान्त्या हनुमान् तत् ग्रहणाय गच्छेत् यदि सीतावृत्तान्त श्रवणविच्छेदो जायेतेति भीत इति भावः । बाल्ये उद्यन्तं सूर्यम् आलोक्य हनूमान् फलभ्रान्त्या तत् ग्रहणायागच्छदिति पुराणकथा ज्ञेया ।

स्नायन्त्याः पयसि स्वीये कस्याश्चित् तरुणस्त्रियः ।
कुचमापततो दृष्ट्वा भीतोभवदपांपतिः ।। 197 ।।

स्नायन्त्या इति । कुचमापततो दृष्ट्वा - कलश इति ज्ञात्वा । स्वभक्षकस्य अगस्त्यमुनेः कलशसम्भवत्वेन तत् प्राप्ति शङ्कया समुद्रः भयमवाप इति भावः ।

सन्ध्याकाले रघुपतिं दर्भपाणिं विदेहजा ।
दृष्ट्वावशात् तु सम्भ्रान्ता ददर्शात्मकुचस्थलीम् ॥ 198 ॥

सन्ध्येति । काकासुरम् आस्तरणदर्भात् जघान भगवान् रघुनाथः । तस्मात् तेन दभ्रग्रहणे कृते - किमिदानीमपि स काकः मत् कुचस्थलम् अखण्डयत् इति ससम्भ्रमं सीता (आत्मकुचस्थलीं) ददर्श इति भावः ।

विपिने चरतो भर्तुः पथि याश्शर्करा स्थिताः ।
ताश्च दूरीकृता भीत्या प्रणयेन च सीतया ॥ 199 ॥

विपिन इति । शर्करायाः दृषद्विशेषरूपायाः भक्तः श्रीरामस्य पादमलसम्बन्धे सति तत्राति अहल्यावत् काचन स्त्री जायेत किमिति सीतया शर्करा दूरीकृता इत्यर्थः । नारी जननशङ्कया भीतिः । शर्कराभिः भगवत् पादकमलयोः सुकुमारयोः वेदना भवेत् इति प्रेम प्रकर्षञ्चेति भावः ।

कोको दृष्ट्वा तु कस्याश्चित् तरुण्याः पृथुलं कुचम् ।
अवाप लज्जां भीतिञ्च भीतिकारणमत्र किम् ॥ 200 ॥

कोको इति । तरुणीकुच जितत्वात् कोकस्य लज्जा प्राप्तिः । कुचं महामेरुं ज्ञात्वा स्वविरोधि रात्र्यागमनहेतोः तस्य दर्शनेन भयप्राप्तिः । भयहेतोः अस्फटत्वेन भीति कारणं किम् इत्युक्तिः । अस्मिन् प्रकरणे शब्दार्थयोः स्फुटत्वेऽपि भावस्यास्फुटत्वम् ।

## अष्टादशप्रकरणं - शास्त्रप्रमेयम्

कान्ते चूडामणि रवि कचध्वान्तसंघौ त्वदीयौ यस्मादेताववविदित मिथो द्वेषलेशौ हि दृष्टौ ।
तस्मात् तेषां नयनपदवीं नाभजः क्वापि नूनं तेजोभावस्तम इति वदन्त्यद्य ये तार्किकाद्याः ॥ 201 ॥

कान्तेति । चूडामणिरूप रवेः कचरूप ध्वान्तस्य च सामानाधिकरण्य दर्शनात् तेजस्तमसोः विरोधम् अभिप्रेत्य तेजोभावस्तम इति तार्किकवचनं त्वत् दर्शनमूलकमित्यर्थः ।

सखि मम कुचकुम्भद्वन्द्वमेतत् यतो मत् प्रियतम भुजदण्डाश्लेषतो वृद्धिमेति ।
तत इह घटहेतुर्दण्ड इत्याह यो वै रसिकवदवभाति प्रायशस्तार्किकोऽपि ॥ 202 ॥

सखीति । तार्किकस्यारसिकत्वेऽपि एतादृशसरसार्थाङ्गीकारात् रसिकत्वमिति भावः ।

त्वदीय कुचकुम्भयोरुपरि चित्तचक्रं मम भ्रमत्यविरतं प्रिये तरुणि दण्डशून्यन्ततः ।
विलक्षणतया विधेरिह विलक्षणव्यापृतेः विभाति तव पीवरस्तनघटस्य सृष्टिक्रमः ॥ 203 ॥

त्वदीयेति । कस्मिंश्चित् पीठे कुलालचक्रं दण्डेन भ्राम्यते चेत् चक्रस्थो मृत्पिण्डः कुलालेन घटाकारतया क्रियते । एवं च घटजनने दण्डजन्य चक्रभ्रमणंव्यापारः तत् जन्यत्वेसतितत् जन्यजनकस्य व्यापारत्व

कारात् । एवं हि लोके घटोत्पत्तिः दृश्यते । घटोपरि चक्रभ्रमणं तदपि दण्डशून्यमिति विलक्षणः तव कुचकुम्भसृष्टिक्रमः ।

दृष्ट्वा यत् तव मध्यमम्बरमिति भ्रान्तो जनस्तत्र चेत्
वापीन्तामवलोक्य कामपि पुनर्नाकाशमेतत्विति ।
बुद्धिं याति हि तद्वलग्नमपि ते शून्यं प्रिये यत् ततो
जीयान् माध्यमिकः परं स निरधिष्ठान भ्रमं वक्ति यः ॥ 204 ॥

दृष्ट्वेति । भ्रमाधिष्ठान भूतं ब्रह्ममात्रं पारमार्थिकत्वेन अङ्गीकृत्य तत्र प्रपञ्चभ्रमः अद्वैतिभिरुच्यते । निराधिष्ठानभ्रमासंभवादिति । माध्यमिकेन तु भ्रम भ्रमकारणादीनाम् अपारमार्थ्येऽपि भ्रमः सम्भवतीति मत्वा अधिष्ठान भूत ब्रह्मणोऽपि अपारमार्थ्यम् उक्तमम् । इह तव वलग्ने आकाश भ्रमो जातः पश्चात् तत्र नाभिरूपवापी दर्शनात् स बाधितः - वलग्नमपि शून्यम् । तस्मात् निरधिष्ठान भ्रम सम्भवात् माध्यपिकपक्ष एव समीचीन इति भावः माध्यमिकश्शून्यवादी ।

एतत् त्वत् कुच काञ्चनाद्रियुगळं निर्हेतुकं मे प्रिये
पक्षीभूतमतोत्र तार्कि कजनैर्यत् दुष्टतोत्घाटनम् ।
हेतोरेतदसिद्धितो न खलु सा हेत्वाश्रया सिद्धता
किञ्च त्वद्वपुषोतिलाघवतया पक्षाश्रया सिद्धता ॥ 205 ॥

एतदिति । काञ्चनमय पर्वतपक्षकस्थले आश्रयासिद्धत्व रूपं दुष्टत्वं हेतोः तार्किकैः उच्यते । इह तावत् तव कुचरूप काञ्चनपर्वतः मे हेतुं विना कारणं विना लिङ्गं विना च पक्षीभूतः प्रीतिविषयो भूतः साध्याश्रयभूतः च । अत्र हेतोः यत् तार्किकैः दुष्टत्वम् उक्तं तत् हेत्वसिद्धिरूपंदुष्टत्वमितिवक्तव्यम् । अत्रहेतोरेवाभावात् स्वरूपासिद्धरूप दोषस्यैव अत्र सत्वात् । परन्तु तार्किकैः तथा न उच्यते । आश्रयासिद्धिरूपदोषस्य सम्बन्ध विशेषेण हेतौ सत्वन्तैरुच्यते । तदसङ्गतम् । आश्रयस्य त्वत् कुचकाञ्चनाद्रियुगळरूप - पक्षस्य प्रत्यक्षसिद्धत्वेनात्राश्रयासिद्धेरभावात् । अत्राश्रया - सिद्धत्वेनात्रा श्रयासिद्धेरभावात् । अत्रश्रयासिद्धरूपदोष एव वक्तव्य इति यदि तेषामाशयः तर्हि हेतोपक्षस्यैवाश्रयासिद्धिःवक्तव्या । कुचाश्रयभूत-त्वदङ्गस्य अतिकृशत्वात् अस्मत्पक्षभूत त्वत् कुचकाञ्चनाद्रि युगळस्यअतिबृहावात् तस्यैवाश्रयासिद्धेः वक्तव्यत्वात् इति भावः ।

आस्ते व्योम्नि सरस्तमोऽपि शशिना त्वय्यस्ति कान्ते तमः
तेजोभावमथाम्बरस्थ सरसः पक्षीकृतौ दुष्टताम् ।
यद्वक्त्येष हि तार्किकस्तदपि तद्रासिक्यहानेरतः
सिद्धं सार्वजनीनमप्यपलपत्यालोक्य चित्रं रसम् ॥ 206 ॥

आस्ते इति । यस्मात् तार्किकः चित्रं रसं - विचित्र रसं श्रृङ्गार रसमित्यर्थः । अपलपति । तस्मात् तस्य

रासिक्यहानिः निश्चयः । रासिक्य हानेः व्योम-सरसः पक्षीकृतौ । दुष्टत्वं-तमश्शशिविरोधं च आहेत्यर्थः । वस्तुतस्तु नीलपीतादि समुदायं चित्ररूपत्वेन यथा सोङ्गीचकार । तत्वत् लवणाम्लादि समुदायं चित्र रसत्वेन न अङ्गीचकार इति भावः ।

प्रिये पूर्णश्चन्द्रो नभसि विलसत्यङ्करहितो हिमांशो तस्मिंस्तु स्फुरति परमर्धेन्दुरपरः ।
अहो तत्रैवास्ते तिमिर विहृतिः नाक्षिणि मम द्विचन्द्रज्ञानं मे भवति कथमन्यादृशमिदम् ॥ 207 ॥

प्रियेति । नयनयोः तिमिराख्य दोषे सति नभसि यथावस्थितः चन्द्र एकः तत् समीपे तत् सदृशः अन्यः चन्द्रश्च भासेत इतीदं द्विचन्द्रज्ञानं लोकप्रसिद्धम् । इदं द्विचन्द्रज्ञानं तु विलक्षणं श्रृणु । अकलङ्कः पूर्णचन्द्र एको भासते । तस्मिन् एव अर्धेन्दुरपरः भासते तिमिर सङ्गोऽपि तत्रैवास्ते ममाक्षिणि नास्ति । कथमिदं अन्यादृशं द्विचन्द्रज्ञानं मम जातं कथयेतित्यर्थः । पूर्णचन्द्रशब्देन कान्तामुखं अर्धेन्दु शब्देन तल्लाटं - तिमिर शब्देन तदळकभारः च उच्यते । न भसि इत्यनेन तिमिरविहृतिरित्यनेन च पुरुषायितं सूच्यते ।

बाले काञ्चन पर्वतौ तव कुचौ पक्षावभूतां हि मे
लिङ्ग तत्र च मानसं मम भवेत् तन्मां विहायाश्रयम् ।
तौ गत्वापि न कुत्रचित् स्थितिमगात् प्रत्येकमाकर्षणात्
युक्तं काञ्चन पर्वत पक्षकस्थले लिङ्गाश्रया सिद्धता ॥ 208 ॥

बाल इति । काञ्चनपर्वत पक्षकस्थले लिङ्गस्याश्रयासिद्धत्वं यत् तार्किकोक्तं तत् युक्तमेव । तव कुचरूप काञ्चनपर्वतौ पक्षावभूतां प्रीतिविषयाविति तात्पर्यम् । तत्र निरतिशय प्रीतिविषयत्वे तादृशं नुमितौ च मम मानसमेव लिंङ्गं - चिह्नं हेतुश्च तत् मां विहाय तौ प्राप्य ताभ्यामपि प्रत्येकमाकृष्टं सत् कुत्राप्याश्रयं नाभजत् - तस्मात् लिङ्गस्याश्रयसिद्धत्वं युक्तमेव इति भावः ।

तरुणि त्वदीयमवलग्नमम्बरं तदुपाश्रितस्तु रशनात्मको गुणः ।
मणिभिस्सशब्दमधिकं भजत्यतो गगनं सशब्दगुणमूचिरे बुधाः ॥ 209 ॥

तरुणीति । शब्दगुणकत्वं आकाशस्य बुधैरुक्तं युक्तमेवेति ।

रोमाळि धूमाळि गृहीत वक्षोरुहाद्रि पाति पृथु बाष्प दृष्ट्या ।
कामाश्रयाशं विलसन्तमस्यां वियोगजं ज्ञानु मिनोति युक्तम् ॥ 210 ॥

रोमाळीति । धूमाळिरेव रोमाळिः । रोमाळि धूमाळिः तया गृहीतः तत् सम्बन्धः । वक्षोरुहाद्रि पाति च यः पृथुबाष्पः अधिकाश्रुजलं - तद् दृष्ट्या तद्वन्नयनेन-लिङ्गेन अस्यां स्त्रियां - ज्ञः बुधः वियोगजं कामाश्रयाशं कामाग्निमनुमिनोतीति प्रकृतार्थः । तार्किकैः पर्वते धूमात ! यथा वाह्नयनुमितिः भवति- एवं धूम बुद्ध्या गृहीत बाष्पादपि तदनुमितिः भवतीति उच्यते । पर्वते उन्नतस्थलात् निर्झरपतने यत् जलकणजालम् ऊर्ध्वं गच्छति ततदूरातवलोकनवतां धूमवत् भाति । तत् बाष्प इत्युच्यते । यद्वा बाष्पः । ऊष्मा-धूमाळित्वेन गृहीतः